॥ श्रीगणेशाय नमः ॥ ॐ अनुमाननिरूपणेनानुमानजिज्ञासानि
वृत्तौ प्रवक्तव्यकक्रमत्वमुपमानेऽस्तीत्यवसरसंगत्योपमानं निरू
पयति ॥ अथेति। अनुमाननिरूपणानन्तरमित्यर्थः। निरूपयति। ल
क्षणस्वरूपप्रामाण्यादिभिर्ज्ञापय [illegible] त्रनिर्देशश्च शिष्यावधा
[illegible] नं त्वलक्षणं
[illegible] पाधिरूपेण
[illegible] जनएवोपमितित्व
[illegible] उपमितित्वस्यैवोपमितिलक्षणत्वे लक्षणे
[illegible] लक्ष्यतावच्छेदकस्योपादानादिति नन्वनुपाधिरूपेणापि तदाह। आष्टेति
।अनुमित्यादिपदात्रयाद्यादिपरिग्रहः। वह्निमानित्यादिविशिष्टा
कीर्तनेनि। नगगनत्वाद्यादेत्यादेराष्टविषयकत्वसामानाधिकरण्यप

रुपमात

पारदाभ्रकलवंगगंधकं भागयुग्ममरिचेन मिश्रितं । आम्रजातिफल
मर्दिताग्निकं तिंतिडीफलरसेन मर्दितं ॥१॥ माषमात्रमनुपानयोगतः
[illegible] सेवितं सकलरोगनाशनं रामबालकृतिका
[illegible]

सद्धेतुरिति। अत एव व्याप्तिविषयकत्वसमानाधिएज्ञानमिदित्युक्तो अ
नुमितित्व [illegible] व्याप्तिशून्यादेरपि तस्यात्वात्तद्वारणाय अव्यभिचारीति व्याप्य
त्वावच्छिन्नं [illegible] नत्राम्र. यदित्यनुमितिनिरूपितत्वमिति तत्त्वस्य व्याप्तिविष
[illegible] पा [illegible] ऽनि व्याप्यस्यापत्याधर्मपदं विहाय पक्षज्ञानी
[illegible] पक्षव्याप्तिविषयकत्वाद्यद्रूपभावे
[illegible] भावः।। ननु परोक्षत्वमिन्द्रिय
जन्य [illegible] हेतो [illegible] मात्रस्य मनोरूपेन्द्रियजन्यतया ऽ न्य
नुमितेरपि परोक्षत्वाभावादित्यत आह प्रत्यक्षान्यत्वमिति। तथा
च न यत्प्रत्यक्षं परोक्षत्वं मेनासंभवस्यादिति भावः। ननु का [illegible] द्रव्ययोष
धीज्वरं हन्तीति यत्र भुक्तपार्णसाद्रव्ययोषधीज्वरं हन्तीत्युक्तं रिन्नेज्व
रहरणं नाद्रव्ययोषध्योः कार्यकारणभावः उपमानेनावधार्यते।

तर्क॰ एवंचेदृष्टान्तस्थले उपमितेः शब्दविषयकत्वाभावात् नोपमितित्वं शब्द
उप॰ विषयकत्वाव्यभिचारिणी जातिः तस्याश्चासंभवेदृत्युपात्तं कतेन
२ न्यितिः। उपमितित्वं हि जातिः। शक्तिपरिच्छित्तिरेव हि उपमा[illegible] न फलोत्प
रह रणोपयोः कार्[illegible]भावाग्रहस्तु अनुमानेनैवेति। शब्दवि
[illegible]मितित्वेनासंभव इति भावः
[illegible]। सादृश्यज्ञानं सहकारी। अति
[illegible]रः। उपमितिः फलं मितित्वं संप्रदाय म
तेवद्रूपेति। आवश्यककत्वात् सादृश्यज्ञानं करणं। अतिदेशवाक्या
र्थस्मृतिर्व्यापारः। उपमितिः फलं मितित्वं नवीनमते नाह। साद
श्यज्ञानादिति। तथा च सादृश्यज्ञानं करणमिति भावः। प्रत्यक्षा २

दानंतर्भाविरांभवान् परिशेषेणतस्यातिरिक्तत्वंव्यवस्थापयितुंप्र
काशीमाह। भिन्नानन्नाद् इति। प्रत्यक्षमिति। यद्यपिप्रत्यक्षसामा
न्यमध्येमानसमपिनिविष्टएव। इदंचेनमानसमिति। कथमुप
...भ्यापारविरहेऽपि जायमानत्वादिति। हे
...निराकृतं। गोबलीवर्दन्यायेनचात्रप्र
...क्षपरमितिध्येयं। ननुमानसात्। अ
नुभूयमानत्वात्। उपमितेस्तेननरं उपमिनोमीत्यनुव्यवसायाद्या
मानसानंतरंचतार्किकाप्रतीत्यनुदयात् मानसत्वेनतस्या इत्य
पर्यः। अनुभवानादरेत्याह। अन्यथेति। अनुभवानादरेतत्पर्यः॥
अनुमिनोमीत्यनुव्यवसायस्यमानसानंतरमनुदयेनानुमि
तेरतिरिक्तत्वासिद्धिः। अनुभवापलापेऽपितुतस्याप्यतिरिक्तत्वं

तर्कप्र. उप. ३ विलीयेतेति भावः ॥ आप्तिदेशानादित्यादि पदान्तर्पक्षधर्मताज्ञान
परिग्रहः । पदाभावादिति । शाब्दबोधसामान्ये पदजन्यपदार्थो
पस्थितेर्हेतुतया तच्छून्यकाले चोपमितेस्तत्वान्नोपमितेः त
द्रूपत्वासिद्धिरिति भावः । ननु गोसदृशो गवयपदवाच्यः इत्याका
शृ०१५ रके [illegible] ऽपि गवयपदवाच्यत्वावगाहिज्ञानमनुपमानं
[illegible] नेन गवयपदवाच्यत्वावगाहिनी
[illegible] ना । नत्र चगवयत्वविशिष्टोपस्थापक
पदाभावेपि गोसादृश्यविशिष्टोपस्थापकपदसत्वात्तज्ञा
पकत्वेवा चकाभाव इत्यत उपमित्याकारकं परिचिन्वन्नाति
ऽऽपमितिरिति । अयमिति । गवय इत्यर्थः । दृष्टा श्रुतेत्य ३

गवयपदवाच्यतानवच्छेदकत्वात् ५

त्वे

पमितेर्दत्वावच्छेदेन गवयपदवाच्यत्वावगाहित्वे गवयत्वावच्छे
देन गवयपदवाच्यत्वावगाहनात् इत्युक्तिविरोधात् अन्यथा
प्रतीतमूलकव्यवहारापत्तेरिति दीधित्यानुद्धारात्। नतीति। ननु
[illegible] त्वावच्छेदेन गवयपदवाच्यत्वावगाहनमिति विभक्ति
[illegible] त्वे गोसादृश्यस्य गौरवेण गवयत्वा
[illegible] वच्छेदकत्वात्। ननु गवयत्वस्यावच्छे
दकत्वे तदवच्छेदेन गवयपदवाच्यत्वस्य प्रतीत्या तदुपपत्ते
ये प्रमितसनंतरं स्वीकरणीयमिति। मह गौरवमिति। गोसादृश्य
स्य गवयत्वापेक्षया गुरुत्वेपि अवच्छेदकत्वकल्पनं न्याय्यः।
धर्मिकल्पनातो धर्मकल्पना लघीयसीति न्यायादिति
भावः। अन्यथेति। गोसादृश्यस्यावच्छेदकत्वमंगीकृत्य प्र

त.कि.प्र. मानांतरासंकलनेसामर्थ्यः। व्यवहारः शाब्दबोधः। शाब्दप्रयोगो वा न अती
उपमा. तमूलांशक्तिमसंस्थितपर्यः। शक्तिकेशाना मूलकएव स्यादिति
४ मावत्। कोस्मादृश्याविच्छेदेनैव गोवयपदवाच्यत्वावगाहिना
नं। अतिदेशवाक्यार्थस्मृतिज्ञानोपरोस्मिन्नतज्ञानात्। गवइति।
म दाशाब्दबोधोऽनुभवसिद्धो विलीयेत तत्प्रकारकशाब्द
रहस्यैव हेतुतया गवयत्वप्रकार
नानात्। एवं व्यवहारप्रतिव्यवहारेणैव
दकज्ञानस्य हेतुतया नाद्दशशाब्दबोधाभावान्तत्‌उ
रंतादृशव्यवहारानुपपत्तिश्चेति गवयपदत्वावच्छेदेनै
वगवयपदवाच्यत्वावगाहिज्ञानमुपेयं। ननु गवयपदवाच्यवि ४

त्रिशेषोपस्थापकपदाभावात् न तच्छाब्दात्मकमिति । एतेन शाब्दत्वनि
रासकरणप्रसंगो येन गवयपदवाच्यतावच्छेदकं च गवयत्वस्य गोसा
दृश्यस्यनेनेति निचारस्य प्रकृतानुपयोगित्वं अग्रे उपमितिस्वाका
नरणत्वेनोचितत्वान्नेत्युपास्तं । उक्तमङ्गुक्तमाशङ्क्यापे च
दोति निषेधयं । नात्पिमत्यतिरित्याह । न चेति । अनु
भवागोचरस्य परत्वस्य गोचरत्वादित्यभावः । अतः प्रत्यक्षादि
प्रमाणेतत्प्रमाणसंभवात् । अतिरिक्तैव प्रत्यक्षादिभ्योऽतिरि
क्तैवेदं अयं गवयपदवाच्य इति प्रतीतिः अयं गवयप
दवाच्यत्वप्रतीतिः । प्रत्यक्षादिप्रमितिभ्यो भिद्यते तद्विलक्षण
धर्मवत्वात् । इत्यनुमानं बोध्यं । तत्प्रदायमतमाह । तस्याः क
रणमिति । सादृश्येति । सादृश्याधिकरणे सादृश्यपिण्डे गोसदृशो

तर्कप्र॰ गवयपदवाच्यत्वज्ञानं वाक्यार्थानुभवं वदस्यार्थः ॥ तत्र स्मृतिः ॥ ताद्दृश
उप॰ वाक्यार्थस्मृतिः ॥ द्वारं व्यापारः ॥ गवयमवैतीति ॥ आरण्यको सदृशः इत्याक
५ रकं सादृश्यनिश्चयः ॥ अतिदेशवाक्यार्थानुभवरूपोपमानस
हकारीत्यर्थः ॥ ननु सादृश्यकरणकं चन तु वैधर्म्यकरणकं ज्ञान
स्याप्यातिरिक्तत्वापत्तिरित्यत आह ॥ तर्कोति ॥ तत्र सादृश्यज्ञा
[illegible] उपमान [illegible] मितिं व्युत्पादयति ॥ पश्चेति ॥ तथा हि
[illegible] धर्म गुणवती पृथिवीति गुरुवाक्यार्थस्मर
[illegible] त्यर्थः ॥ एवं गन्धवतीति ॥ पूर्वं जलादिविधर्म्यगुणत्वे
न दृष्टानां तु गन्धत्वेनेतरभेदाः अनुमानरीत्या ज्ञातिः ॥ गुरुणा इ
त्युक्तरीत्या इत्यर्थः ॥ ननु वैधर्म्यज्ञानजन्यज्ञानस्योपमिति ५
त्वस्वीकारे हान्या इत्यपवर्ग्य ज्ञानमोः परस्परजन्योपमिति

तो व्यभिचारेण कार्यकारणत्वसंभवइति अत आह । तस्मादिति
।साध्यरूपज्ञानजन्यो पमितेरिनवै धर्म्यज्ञानजन्योपमितेरनु
भवो [illegible] त्याउपकोपान [illegible] त्वादित्यर्थः । यत्किंचिदिति । साध्यस
[illegible] नियतरविशिष्टेत्यर्थः । विशिष्टय विशेषणधर्म पुरस्कारे
[illegible] चितेति । आनितेणि नत्रान्तिकं कपदव्याच्यत्वरूपेत्यर्थः
[illegible] व्याकिंचिदनीति सामान्यतस्तज्ञानिति एकेनिर्णयात्वि
शिष्यसुके । अतएवसामान्यधर्मप्रकारकज्ञानस्याबानत
धर्मप्रकारकजिज्ञासाप्रतिहेतुनमागविशेषधर्मप्रकारकजि
ज्ञासाबोधकः कि छन्दोगवयइतिप्रश्नोप्युपपद्यइति ध्येयं
।करणमिति । उपमितिनि सामान्ये साध्यरूपेवधर्म्यान्पतरथ
मितावच्छेदककविशिष्टयानिर्णीतत्रापतावच्छेदककपदवा
च्यत्वरूपवाक्यार्थानुभवः करणमित्यर्थः । विसादृश्येष्यु

त॰ कि॰ टिप॰

धर्मितिप्रसंग इत्यत आह । किंचिद्धर्मविशिष्टइति । गवयत्वादिरूप
धर्मविशिष्टइत्यर्थः । तद्वत्ताधीरिति । यद्विशेष्ये यदवच्छिन्नभ
वः तत्तद्वत्ताधीरित्यर्थः । गवयत्वादिविशिष्टे सादृश्यधीरिति भा
वः । ननु एव एकधर्मविशिष्टे सादृश्यज्ञाने धर्मान्तरविशिष्टप
दवाच्यत्वावगाहिन्युपमितिस्स्यादत आह । यद्धर्मावच्छेदेन सादृश्य
ज्ञानेन तद्धर्मावच्छेदेनैव पदवाच्यत्वावगाहिनी उपमितिरित्युप निह्
[illegible] गवयत्वादिरूपलघुधर्मानुपस्थितौ यदा गुरुध
[illegible] एव सादृश्यज्ञानं तदा तदवच्छेदेनैव पदवाच्य
त्वावगाहिनी उपमितिस्स्यादित्यतिप्रसङ्गमाह । यदन्यत्रेति । ल
घुधर्मे गवयत्वादिरूपे ज्ञाते न तु स्फुरणे गवयत्वाद्यज्ञाने ।
गुरुधर्मेणेति । विलक्षणसंस्थानवत्त्वरूपधर्मविशिष्टेत्य
र्थः । सादृश्यादिस्यादि यदा तु वैधर्म्यपरिग्रहः । तदवच्छेदेनै ६

ऽवच्छिन्नत्वस्य … स्यानवच्छिन्नरूपगुरुधर्मावच्छेदेनैवव्याप्यताग्र
हः। तन्मयपदव्याप्यताग्रहः। गुरुधर्मविशिष्टे वा व्याप्यताग्रहः। बाधा
दिति। लघुधर्मोपस्थितौ लघुधर्मेण व्याप्यतावच्छेदकेऽभावविति गुरु
[illegible]स्वीकारस्यावश्यकतया लघुधर्मविशिष्ट एव पदव्याप्य
[illegible]ानमुत्पद्यते। गुरुधर्मविशिष्टविषयकज्ञानेत्वप्रा
[illegible]ननेदनन्तरं जायत इति भावः। केचित्तु लघुधर्मानु
पस्थितौ गोसादृश्यावच्छेदेनापि पदव्याप्यताग्रहात्तत्र सा
दृश्यगोत्वेनैतावच्छेदकमित्युक्तमकुत्रेत्याहुः। तदाचीनि।
गुरुधर्मविशिष्टे सादृश्यादिधर्मविशिष्टे। तदवच्छेदेनैव सा
दृश्यावच्छेदेनैवेत्यर्थः इति व्याचक्षते। तदसत्। गुरुधर्मवि
शिष्टे एव सादृश्यादिज्ञानं जायते। इत्यस्यासंगतत्वापत्तेः
गोसदृशो गोसदृश इत्याकारकस्य सादृश्यज्ञानस्यासंभवेन तदादिति दिक्

त.कौ.प्र.
पु.२४.

ननु संभवत्येवं मयधनुमानस्य प्रामाण्यं अनुमानाधीनत्वात्किंत्वग्रहमू
लकत्वाद्वाक्यार्थानुभवरूपोपमानस्य न देवलं न प्रमाणाभा
वात् एवं चनोपमानशब्दयोरपीत्याह तेन चत्वारि प्रमाणानी
ति तथ्यावधूमादिगोचरप्रवृत्तेः वाद्युक्तस्य बहुनापरामर्शरू
पविशेष्यदर्शनमूलकप्रत्यक्षादेवोपपत्तेर्नानुमानस्य प्रमा
णत्वं न च तत्त्वमपत्वावच्छिन्नकाले सा ध्यज्ञानस्य व्यापकत्वात्
[illegible] विषयकोपनीतभानोपपत्तावपि इतरभेदज्ञान
[illegible] नेतरव्यापकीभूताभावप्रतियोगित्वपृथिवीत्व
[illegible] पृथिवीत्वादिव्याप्तिज्ञानकाले इतरभेदज्ञानाभावात्
तदुपनीतभानासंभवेन तत्र प्रमित्यंतरस्वीकार आवश्यक
इति वाच्यं। अभावत्वादिसामान्यलक्षणा [illegible] संनिक
र्षबलादेवेतरभेदगोचरप्रत्यक्षोपपत्तेः। एवं घटमानेयति ॥७॥

वाक्यश्रवणानंतरं घटकर्मत्वानयनकृत्यादीनां परस्परसंसर्ग
विषयकविलक्षणमितिरसिद्धत्वाद्बोधः एवं पदार्थोपस्थि
तेरानन्तर्य[illegible]ज्ञानादिकामानसोपनीतभाने नैवनिर्वाहात् ॥
[illegible]णोपस्थितेरनेपत्वात् कथं संसर्गबोधे इति वाच्यं ॥ ना
[illegible]वत्वात् तस्यापि संसर्गनियमाभाने बाधकाभावात्
[illegible]दुपनीतभानं प्रतिविदुपनायकज्ञानत्वेन कार्यकारण
भावे व्यभिचार इति वाच्यं ॥ सांसर्गिकविषयताभिन्नालौकिक
विषयताया स्वजन्यतावच्छेदकत्वेन व्यभिचाराभावात् प्रमि
तं न स्वीकारे नतिमात्मकवत्कृतेन कार्यकारणभावकल्पना
पेक्षया सांसर्गिकविषयताभेद इति वेदे लाघवस्यातिस्फु
टत्वात् ॥ योग्यताज्ञानस्य च शाब्दसामान्यहेतुतया संसर्गविष

तर्कप्र. कर्मणोऽन्यतराज्ञानसत्वात् सांसर्गिकविषयताभेदानिवेशोपि अस
अनुमा. भावाच्च। एवं गवयपदत्वविशिष्टे साध्यज्ञानसहकृतेन ... सह
कृतगवयपदवाच्यत्वनिश्चायकोपमानसंसर्गगवयपदवा
च्यत्वनिश्चायकमप्युपनीतभानमेवेति कथमेतन्न द्वित्यचेत्
अत्राहुः। लिंगपरामर्शजन्यत्वन्नमितित्वं तत्तमनुमितित्वम्।
[illegible] व्यवसायस्तादनुभवासिद्धस्तादृशधर्मीभूतानुमि
[illegible]तितानिर्विशेष्यावच्छिन्नकरणतया अनुमानस्य प्र
[illegible]तरत्वं। अयं पर्वतो वह्निमान् पर्वतो न वा इत्यनुमित्य
नंतरं पर्वते वह्निमनुमिनोमीत्यनुव्यवसायापत्तावह्नि
निष्ठविधेयताख्यविलक्षणविषयतानाविर्भाव उपगंतव्यः
पक्षाभावात्तु न तदनंतरं तादृशोनुव्यवसायः। एवं चानु १८॥

मितोमीत्यनुव्यवसायस्यज्ञानविषयताविशेष्यविषयकत्वे
नोपपत्तेरत्वमनुमितित्वस्यजातित्वस्वीकारेणेतिकुतस्तद
वच्छिन्नकरणतयाप्रमाणांतरत्वमितिचेन्न।लिंगपरामर्श
विशिष्टताद्रशनिर्वस्तुत्वाकङ्क्षानानुपपत्त्यात्तदवच्छिन्नकरण
[illegible] स्यप्रमाणांतरत्वमिति वस्तुतस्तु।अनुमिनोमी
[illegible] सायस्यज्ञानविषयतामात्रविषयकत्वेऽप्या
पत्तिरूपाष्ट्वोधोत्तरमादिनाद्रशानुव्यवसायापत्तेः।अनु
मित्यापत्तिरूपाष्ट्वोधादिष्वुताद्रशविषयतापा [illegible]
[illegible] ऐक्यात्।अनुमितित्वजातिस्वीकारेतु
आपत्त्यादिष्वुताद्रशजातेरसत्वात्तेनताद्रशानुव्यवसाया
पत्तिरितितदवच्छिन्नकरणतयाऽनुमानस्यप्रमाणांतर
त्वमावश्यकमेव।एवंशाब्दश्रावणानंतरंजायमानद्वीनो

त.कौ. नरं त्वात्स्यामीत्यनुव्यवसायोत्पत्त्यानादृश्यमतव्याप्तिसिद्धत्वात्पच्छा
कुं.प. श्यज्ञानेनिश्चयानवच्छिन्नकरणत्वमात्रादृष्टप्रामाण्यसिद्धिः।
९ एवंउपमितेनोमीत्यनुव्यवसायबलादुपमानसा। पित्रमाणां
त्वरत्वं। [illegible] नन्वायात्वनुमितित्वादितव्याप्तिन
स्तत्प्रत्यक्षत्वच्याव्यंमेनारसंता न दयावच्छिन्नकरणस्यचनप्रमाण्
नरत्वं। अथानुमित्यादेर्मानसत्वेनदुनरंसाक्षात्करोमीत्य
[illegible]प्रापत्तिः। अनुमित्यादेः साक्षात्कारत्वादितिचेन्न।।
[illegible]विषयतात्वालिसाक्षात्कारत्वस्यैवतादृशप्रतीति
विषयत्वात्। अतएवसुरभिचंदनंइत्यादावुपनीतभानानं
तरंपश्यामिचंदनं न सौरभंमिमितिसार्वजनीनः प्रत्ययःसं
गच्छते। तथाचालौकिकविषयतयाः साक्षात्कारत्वव्याप ।९।।
कतयानानुमित्यादुनरंसाक्षात्कारेमीतिप्रत्ययः। अथे

त्वे
तत्र प्रत्यक्षत्वे मानाभावः। साक्षात्करोमीति प्रत्यक्षा
भावेन प्रत्यक्षस्य अप्रयोजकत्वाच्चानुमानस्यापि मानत्वे
न चक्षुःसाक्षात्कारित्वात्। अत्र कश्चित्। अनुमितित्वादेः प्रत्यक्ष
त्वव्याप्यत्वे। लाघवमेव तथाहि अनुमितिसामग्रीकाले
प्रत्यक्षसामग्रीकाले प्रत्यक्षतारणानुमितिसामग्र्याः मा
प्रत्यक्षं प्रति प्रतिबंधकत्वं कल्पनीयं प्रत्यक्षव्याप्यत्वे त्व
त्वनुमित्यात्मकप्रत्यक्षस्यैवोत्पत्त्या तदकल्पनप्रयुक्त
लाघवमप्युक्तमेवेति। तदसत्। अनुमितित्वस्य चाक्षु
षत्वव्याप्यत्वे च परामर्शानन्तरोत्पन्नज्ञाने अनुमि
तित्वानापत्तेः। चाक्षुषत्वस्य तद्व्या[illegible]प्यत्वमत
एवासंभवि परस्परव्यभिचारिणोस्तयोरेकत्र समावेशो

अ.दी. सां कर्यानुमितौ मिनिचाक्षुषत्वादिविरुद्धं तदुपयोग नक्षी। एवं चानु
५८ मितिसामग्रीकाले चाक्षुषादिवारणाय चाक्षुषादिकं प्रति
१० अनुमितिसामग्र्याः प्रतिबंधकत्वं कल्पनीयं [illegible]
[illegible]
[illegible]
[illegible]
[illegible]
[illegible] मात्रस्य
[illegible] यं। एवं च सामान्यतः प्रत्यक्षं प्रति अनु
मितिसामग्र्याः प्रतिबंधकत्वं मयापि न [illegible] कल्प्यते १०
इति लाघवं। ननु अनुमितित्वादेः प्रतिसत्वव्याप्यत्वमे

नासत्वां। अनुमितिसामग्रीकाले मानसवारणाय मानसं
प्रति अनुमितिसामग्र्याः प्रतिबंधकत्वकल्पने गौरवं। मन्म
ते तु अनुमित्यात्मकमानसस्यैवोत्पादेन न तत्रैतद्व्याप्तेः।
न च वह्न्यनुमितिसामग्रीकाले घटादिमानसवारणाय तत्
प न प्रतिबंधकस्यावश्यकत्वात् घटादिकमानिवेश्य मानस
त्वमेव तत्प्रतिनिवेश्यतावच्छेदकमिति वाच्यं। घटादिमान
सं जायतामितीच्छानामुत्तेजकत्वानुरोधेन विषयानिवे
श्ये च प्रतिबंधकत्वकल्पनस्यावश्यकत्वात्। एवं चाद्या
दिस्थले पीतिमेवं। घटादिव्याप्यकुड्यसामग्रीकाले वह्निमा
नसानुदयेन व्याप्यकुड्यसामग्र्याः मानसं प्रति प्रतिबंधक
तायां घटादिव्याप्यकुड्यसामग्रीकाले वह्न्यनुमित्युत्पत्तेः। अनु

न०कदि मित्यनुमानसत्वमेवचान्वयुक्तसामग्रीप्रतिबध्यतावच्छेदक
भवतावान्मितिअनुमित्सन्यत्वानिवेशेगौरवात्।एवमनु
११ मितिसामग्रीकालेऽनुमित्सन्यमानसंवारणायानुमित्सय
मानसत्वमनुमितिसामग्रीप्रतिबध्यतावच्छेदकमुपेय
मितिरसामग्र्याःप्रतिबंधकत्वकल्पनंआवश्यकमनुमित्स
न्यत्वानिवेशेगौरवपुनरधिकंएवंशाब्दोपमितिस्थलेशाब्द
त्वोपमित्यन्यत्वनिवेशेणत्रगौरवमितितेषांनमानसा
नर्याविदुतिसुष्टुक्तंचत्वारिप्रमाणानीतिदिक्॥ ॥६
तिश्रीदीक्षितश्रीकृष्णशर्मविरचितायांन्यायसिद्धांतमं
जरीदीपिकायामुपमानपरिच्छेदःसमाप्तः।पौषवदि२र
संवत् १८३५॥शुभंभवतु।कल्याणंभवतु॥श्रीरस्तु। ११

१

॥प्राणनाथसंश्रांजंपुस्तकं॥

॥न्यायसिद्धांतमंजरीप्रारंभः॥

॥शुभंभवतु॥

तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्य
इत्यस्यामात्मज्ञानस्यैव मोक्षसाधनत्वश्रवणात्

न्या॰ सि॰ मं॰ ॥श्रीगणेशाय नमः॥ ॥प्रणम्य परमात्मानं जानकीनाथशर्मणा ॥ क्रि-
यते युक्तिमुक्ताभिर्न्यायसिद्धान्तमञ्जरी ॥१॥ इह किल निखिललोकवि-
मोक्षमुख्योपायं मननोपायमात्मनस्तत्त्वज्ञानमामनन्ति। तच्च प्रमाणा-
धीनमिति प्रमाणं निरूप्यते। तत्र प्रमायाः करणं प्रमाणं। प्रमा च यथा-
र्थानुभवः। तदाहुराचार्याः। यथार्थानुभवो मानमिति। ननु किमिदं यथा-
र्थ्यं किं वानुभवत्वं उच्यते। तद्वति तदवगाहित्वं यथार्थ्यं। भव-
[illegible]दयस्थाने इदं रजतमिति ज्ञानं रजतत्ववति तदवगाहीति यथार्थं।
शुक्तौ इदं रजतमिति ज्ञानं च न रजतत्ववति तदवगाहीति न यथार्थं।
न च एवं रजते इदं रजतं न वेति संशयोऽपि प्रमा स्यात् इति चेन्न। रज- ॥१॥

यादृशाकारस्य धारणं तादृशाकारीका माधमनो हि
शरा प्रमाणां ज्ञानं जन्यते तेन स्य प्रमाणत्वं इति निष्कर्षः

६ कार्यत्वावच्छिन्नकार्यतानिरूपित
कारणताभिन्नकारणत्वं करणत्वं ।

नाद्यप्रमेयत्वस्य ॥ न द्वितीयः तदनुभवः तत्प्रमेति प्रमाणिकाः ॥ ननु स्वाव-
च्छेदेन कपिसंयोगवति वृक्षे मूले वृक्षः कपिसंयोगीति प्रत्ययोपि प्रमा स्या-
त् । कपिसंयोगवति वृक्षे तदवगाहित्वादिति चेन्न । वृक्षे कपिसंयोगः
... मूलावच्छेदकस्तु न तथा प्रमा । नस्य तदवच्छेदकत्वान्न स्यादिति भि-
न्नज्ञानत्वमनुभवत्वं । जातिविशेषो वा । अनुभवामीत्यनुगतप्रतीते-
र्बाधकं विना जातिविषयकत्वात् । करणत्वं च व्यापारवदसाधारणका-
रणत्वं । घटं प्रति कपालसंयोगकारणाय व्यापारवदिति ॥ ईश्वरज्ञानवा-
रणाय असाधारणेति । नन्वेवं ज्ञानं प्रति आत्मापि करणं स्यात् । आत्ममनः म२
संयोगस्य व्यापारस्य सत्वात् । तज्जन्यत्वे सति तज्जन्यजनको व्यापारः ।

कुठारवतः १   छिदिकृतः   यथा वृक्षं छिनत्ति देवदत्तः

सं० भवति च संयोगः आत्मजन्यं आत्मजन्यज्ञानजनकश्चेति स्यादेव। उपाधीनां क
२ रणत्वादीनां भेदाद्व्यवहारभेदः। अत एव विवक्षातः। कारकविभक्त
यो नानाभवंतीति। अत एव आत्मानमात्मनावेत्सीति तृतीया। क्रियादित्य
मिश्रास्तु। करणाद्याकारानुगतमते करणत्वादिकमखंडोपाधिरूप
सामान्यमंगीचक्रुः। तच्च प्रमाणं चतुर्विधं इत्याह भगवान् सूत्रकारः। प्रत्य
क्षानुमानोपमानशब्दाः प्रमाणानीति। तत्र साक्षात्काररूपप्रमाक
[illegible] प्रत्यक्षं। साक्षात्कारत्वं च साक्षात्करोमीत्यनुगतप्रतीतिसाक्षि
को जातिविशेषः। न चैवमिंद्रियजन्यज्ञानत्वं विषयाज्ञान मात्र
स्य मनोरूपेंद्रियजन्यत्वात् इंद्रियाप्रतीतावपि तत्प्रतीतेश्च। न २

तत्त्वाभिमानास्तु यत्नादिजातिविशेषाः। अननुगतत्वात्। यद्वा जन्यधीजन्यमात्रवृत्तिजाति ज्ञानत्व
मत्त्वं ज्ञानत्वेन तत्। न च निद्रिजन्यधीजन्यमात्रवृत्तिरनुमितित्वादि तद्भिन्नत्वं सा
क्षात्कारमात्रे। न च निदिध्यासनजन्यमात्रवृत्तियोगजनकतावच्छेदकजातिम
त्तित्वं साक्षात्कारेऽव्याप्तिः। मनसो वृत्तित्वेन जातेर्विशेषणीयत्वात्। मान
सत्वं च जातिविशेषः इत्यास्तां विस्तरः। नास्तिकास्तु वैशिष्ट्यानवगाहिज्ञानं साक्षा
त्कारः। अयं पटः इत्यादिज्ञाने साक्षात्कारत्वप्रत्ययो भ्रान्तिः घटत्वात् अलीकवि
षयत्वादित्याहुः। तन्न। बाधकं विना भ्रान्तित्वायोगात्। न चालीकविषयत्वं बाधकं मेवत्
१.२: घटत्वादि अलीकत्वासिद्धेः। स च साक्षात्कारो द्विविधः। नित्योऽनित्यश्च। नित्यो
भगवतः। अनित्योऽन्यः। अनित्यो द्विविधः। निर्विकल्पकः सविकल्पकश्च। तत्र वै
शिष्ट्यानवगाहिज्ञानं निराकारकं वा ज्ञानं निर्विकल्पकं। तच्च यद्यपि न प्र

घटत्वविशिष्टज्ञानं न ज्ञानकं। ... [illegible] ... ७

त्वा विशेषस्यासिद्धेः अतीन्द्रियत्वाभ्युपगमात्। न चापि अयं घटः इति विशिष्टज्ञानरूपकार्या
॥२॥ नुमेयं। न चादि अन्यतद्विशिष्टज्ञानं प्रति तद्विशेषणज्ञानं कारणमिति निर्विवादं।
भवति च प्राथमिकमस्माकं घटः इति ज्ञानं जन्यघटत्वविशिष्टज्ञानमतस्तत्रापि
घटत्वज्ञानं कारणं। न च तदानीं घटत्वविशिष्टज्ञानमस्ति विशेषणीभूतघटत्व
स्याज्ञानात्। ततो वैशिष्ट्यानवगाह्येव तज्ज्ञानं। तदेव च निर्विकल्पकं। न च जन्मांत
रीय घटत्वविशिष्टज्ञानं तत्र कारणं। अव्यवहितपूर्वकालवर्त्तिन एव विशेषणज्ञानस्य तत्र हे ता
तुत्वात्। भगवत्ज्ञानस्य व्यधिकरणत्वात्। ननु वस्तु घटत्वविशिष्टस्मरणमेव तत्र का
रणं। न च विशेषणज्ञानं विना तदेव विशिष्टज्ञानं कथमिति वाच्यो। विशिष्टानुभवे हि
विशेषणज्ञानं कारणं। न तु स्मरणेऽपि। तेन विनाप्युपपत्तेः। अन्यथा नवस्थानात्।
अस्तु वा घटत्वस्मरणं इति चेन्न। चैत्रत्वादिविशिष्टबुद्धौ तदसंभवात्। न हि चै ॥३॥

घटत्वादिप्रकारेणानुभूतं मनः स्मरेत्। न चानुभवं विना स्मरणं। तस्य तद्धेतुत्वात्।
विनयत्र घटत्वेन स्मरणं तत्र विशिष्टज्ञानसामग्री अभावात् घटघटत्वयोः सा
क्षात्कारसामग्रीतः साक्षात्कारोत्पत्तौ न किंचित् बाधकमस्ति। तदेवास्माकं
निर्विकल्पकमिति निसंक्षेपः। ननु विशेषणज्ञानस्य हेतुतासिद्धौ सर्वमेतदेवं
स्यात् तत्रैव च मानं न पश्याम इति चेन्न। अन्वयव्यतिरेकाभ्यां तदवधारणात्।
विस्तरस्तु मणिमरीचावनुसंधेयः। विशिष्टावगाहिसप्रकारकं वा ज्ञानं सवि
कल्पकं। प्रकारता चायं घटः इत्यादिज्ञाने विशेषणस्य घटत्वादेर्विशेषण
तापरनामा विषयताविशेषः विषयता च विषयाकारप्रतीतिसाक्षिका। स्वरूप
संबंधविशेषः। पदार्थान्तरमेकदेशिनः। भाट्टास्तु ज्ञातो घटः इति प्रतीतेः ज्ञानजन्य
विषयनिष्ठप्राकट्यापरनामा [illegible] पदार्थो ज्ञाततासेन विषयता ज्ञानविष
[illegible]।

न्या.सि.मं. मयोः संबंधः स्वरूपाख्यश्चेन्न । कथमन्यथा ज्ञानकर्मत्वं घटादेः क्रियाजन्य ॥४॥
॥४॥ फलशालित्वाभावादित्याहुः । तन्न विनष्टे घटे ज्ञानमिति प्रतीतेः न हि तत्र ज्ञा
नं किंचिज्जनयितुं शक्नोति । तस्यैवासत्वात् । न च समवायिकारणत्वं विना
भावकार्योत्पत्तिः संभवति । तत्र स्वरूपसंबंध एव प्रतीतेर्विषय । इति चेद
न्यत्रापि स एवास्तु कृतं समवायिकेन कर्मविभक्तेरपि इदं द्वे वौपपत्तिरिति संक्षे
पः । अन्यत्तु भासमानवैशिष्ट्यप्रतियोगित्वं प्रकारत्वं । अयं घट इत्यत्र घटत्व
स्य वैशिष्ट्यं भासते तत्प्रतियोगि च घटत्वमित्याहुः । तन्न दंडपुरुषसंयोगा इद
तिसमू[illegible]तं बने दंडीपुरुष इतिवद्दंडस्य प्रकारतापत्तेः । संयोगो हि दंडस्य
वैशिष्ट्यं भासते न तत्प्रतियोगी च दंडः इति दिक् । तच्च प्रत्यक्षमिंद्रियात्मकं द्वे ॥४॥

न पुनः तद्ग्राहकं १

द्रव्याद्रव्यग्राहकं चेत्तन्न द्रव्यग्राहकानि चक्षुस्त्वङ्मनांसि। अन्यद्घ्राणरसन
श्रवणं वा। ननु मनसो द्रव्यग्राहकत्वे सति अन्धस्यापि विप्रकृष्टघटोपलब्ध्या
पत्तिः। न चेतदात्ममात्रग्राहकं सर्वविषयकत्वसिद्धौ तद्व्याघातान्न। उच्यते। मनः
सर्वविषयकमपि बहिर्विषयकज्ञानजनने परतंत्रं। परं च चक्षुरादिःऽ
१ नि पस्थितौ योगजधर्मः सामान्यलक्षणा च। न पुनश्चक्षुरादिमात्रेऽस्मदाद्यर्था
नां मनसा संसर्गो न ह्यात। कथमन्मथाकविकाव्यादिषु योगिनां योगजधर्मप्र
त्यासत्या मनसा सर्वसाक्षात्कारः। प्रमेयत्वादिसामान्यलक्षणप्रत्यासत्त्या
मनसा संसर्गोऽप्यत्र। किं न हि मनः स्वतंत्रं। अबाह्यवस्तुनि कान्यबाह्यानि।
कीआत्मानं वा ग्यगुणास्तदभावस्तद्वृत्तिजातिश्च केवलयोग्यगुणाः सविकल्पक

नं.स. ज्ञानेच्छाप्रयत्नसुखदुःखद्वेषास्तदेकत्वपरिमाणे च। तदेकत्वपरिमाणे
न योग्ये इति तु टीकाकृतः। नन्वित्थं परा त्मा परमाणुस्तेन तद्गुणाश्च।
न परा मतद्गुणानां यतोऽयोग्यत्वात्स्यादेतत्। चक्षुर्यदि द्रव्यग्राहकं तदा
परमाण्वादयोऽपि गृह्येरन् इति चेन्न। तेषां चक्षुरयोग्यत्वात्। किं ताव
च्चक्षुर्योग्यं। महदुद्भूतरूपवद्द्रव्यं परमाणुश्च न महान्। आत्मा
द्यश्च न रूपादिवंतः पिशाचादयश्च नोद्भूतरूपवंतः। तद्रूपस्यानु
द्भूतत्वात्। उद्भूतत्वं च जातिविशेषः इत्येके। अनुद्भूतत्वरूपजात्यभा
स भाव इत्यपरे। योग्यगुणो योग्यद्रव्यं रूपतन्मात्रवृत्तिसंख्यापरि। ॥५॥

गत १

पनुक वारिस्थतेजः त्वचा न गृह्यते उद्भूतरूपस्याभावात्

माणपृथक्त्वस्नेहसंयोगविभागपरत्वापरत्वद्रवत्ववेगाः। मावप
टघटाकाशसंयोगादिवारणाय। कर्म च योग्यद्रव्यसमवेतं। जाति
श्च योग्यवस्तुगता द्रव्यत्वरूपत्वादिः समवायश्च। त्वचो महदुद्भूतस
पर्शवद्योग्यं द्रव्यं। तेन परमाणुवायुप्रदीपप्रभादयस्त्वचा न गृह्यंते।
परमाणोरमहत्वात्। वायोर्निरूपत्वात्। प्रभायाः उद्भूतस्पर्शाभावात्।
गुणाश्च रूपातिरिक्ताश्चक्षुर्योग्या महदुद्भूतस्पर्शवन्मात्रवृत्तयो मह
दुद्भूतस्पर्शश्च। अत एव वायुपरिमाणादयो त्वचा न गृह्यंते। चक्षुरयोग्य
त्वात्। न वा दीपप्रभापरिमाणादयः उद्भूतस्पर्शवद्वृत्तित्वात्। न वाय
टप्रभासंयोगादय उद्भूतस्पर्शवन्मात्रावृत्तित्वात्। नत्र हि अनुद्भूतस्पर्शोदयो

मे.ने. वर्त्तते। रूपमेवयोग्यद्रव्यसमवेतं सामान्यं च योग्यवस्तुगतं समवायश्च। मीमां
सकास्तु। मेंदुद्भूतस्पर्शवद्द्रव्यत्वमेव त्वचोयोग्यत्वात्। अथवा तू उद्भूत
रूपमपि तस्य योग्यंकं गौरवादतो वायुरपि स्पार्शनप्रत्यक्षः। नचवं
हिरिंद्रियसाक्षात्कारत्वावच्छेदेन उद्भूतरूपस्य हेतुत्वात् वायौ च तद
भावान्नेरमितिवाच्यं। अथवा द्रव्यचाक्षुषत्वावच्छेदेन तद्धेतुत्वादित्या
हुः नैयायिकास्तु। समवायो न प्रत्यक्षः। संबंधप्रत्यक्षे यावदाश्रयप्र
त्यक्षस्य हेतुत्वात्। कथमन्यथा घटाकाशसंयोगोपि न प्रत्यक्षः। नच
समवायस्य सर्वेश्राश्रयाः प्रत्यक्षाः परमाण्वादेः रयोग्यत्वादित्याहुः।
तन्नतेत्र्या हेतुतायां मानाभावात्। नच घटाकाशसंयोगस्य प्रत्यक्षं

नावगतिः। योग्यमात्रसमवेतगुणस्येंद्रिययोग्यत्वात्। किंचिल्लाघवात् संयोग
प्रत्यक्षत्वावच्छेदेन यावदाश्रयप्रत्यक्षस्य हेतुतायुज्यते। न तु संबंधप्र
त्यक्षत्वावच्छेदेन संबंधत्वं हि संयोगान्यतरत्वमिति गौरवात्। घ्राणयो
ग्यो महत्त्वमहत्त्वसमानाधिकरणोद्भूतो गंधः। तद्वृत्तिं सामान्यं तयोः सम
वायः। अत एव न परमाणुगंधो गृह्यते। महत्त्वासमानाधिकरण
त्वात्। न वा घ्राणमणिव्यत्र्यादिगंधः अनुद्भूतत्वात्। रसनायोग्यो म
हत्त्वसमानाधिकरणोद्भूतो रसः। तद्वृत्तिं च सामान्यं तयोः समवायः। ते
न परमाणुरसो न गृह्यते। महत्त्वासमानाधिकरणत्वात्। न वा मण्यादि
रसः अनुद्भूतत्वात्। श्रवणयोग्यः शब्दः तद्वृत्तिजातिस्तयोः समवायश्चेति
संक्षेपः। तस्य चेंद्रियस्य सन्निकर्षा अर्थग्राहकत्वात्संनिकर्षाः सहकारिणः

ता॰ टी॰ कृतः सन्निकर्षो । संयोगः संयुक्तसमवायः संयुक्तसमवेतसमवायः
समवायः समवेतसमवायो विशेषणता च । अथ केन सन्निकर्षेण किं गृ
ह्यते । द्रव्यं संयोगेन गृह्यते गुणः कर्म द्रव्यगत जातिः संयुक्तसमवाये
न । भवति हि चक्षुरादिसंयुक्ते घटादिसमवेतं रूपादिस्पंदो जाति कर्म
श्च द्रव्यत्वादिः गृह्यते । गुणकर्मगता जातिः संयुक्तसमवेतसमवाये
न । भवति हि चक्षुरादिसंयुक्तं घटादिः तत्समवेतं रूपादि तत्र समवा
यो रूपत्वादेः गृह्यते समवायेन । कर्णशष्कुल्यवच्छेदेन नभसि गृह्यते शब्दस्य स
मवायात् । शब्दगता तु जातिः समवेतसमवायेन श्रवणसमवेतश
ब्दे गृह्यते शब्दत्वादेस्तो समवायात् । विशेषणतया समवायो भावश्च । तत्र सं ७
ता

योगसमवायमोरभावात्। सा च विशेषणता द्विविधा। इंद्रियविशेष
णता इंद्रियसन्निकृष्टविशेषणता च। तत्रेंद्रियविशेषणतया आकाशा
भावो गृह्यते। इंद्रियस्य श्रवणेन तस्य विशेषणत्वात्। इंद्रियसन्नि
कृष्टविशेषणतया भूतलादौ घटाभावादि। इंद्रियसंनिकृष्टभूतले
तस्य विशेषणत्वात्। इंद्रियसंनिकृष्टस्य विशेषणता च बहुविधा
संनिकर्षस्य बहुत्वादेव सेया॥ ननु संयोगेन प्रत्यासत्तिः। संयुक्त
समवायेन घटादिग्रहसंभवात्। इंद्रियसंयुक्तेरूपादौ तेषां
समवायात्। मैवं। आत्मनि तदसंभवात्। तस्यासमवेतत्वादि
लक्षणः। स्यादेतत्। अंधकारस्य घटादि किमिति। न चक्षुषानोप

न्या०सि० यत उच्यते। संयोगप्रत्यासत्तेः सत्त्वात्। उच्यते। चक्षुषो द्रव्यग्रहे महदु
॥का॥ द्भूतरूपालोकसंयोगः सहकारी तेन नांधकारस्य घटस्योपलि
१६ न च महदुद्भूतेति व्यर्थं। तेन परमाणुचक्षुरादिसंयोगयोर्विषया
नत्वात्। नन्वेवं चक्षुषा तेजःप्रत्ययो न स्यात्। तत्र तेजःसंयोगा
भावात्। प्रदीपे तत्प्रभासंयोगोस्तीति चेन्न। मणिप्रभादौ तदभा
वात्। दृश्यते च महांधकारे चंद्रकांतप्रभृतिमणिविशेषप्रभा।
अथालोकेतरद्रव्यचाक्षुषं प्रति आलोकः सहकारीति चेन्न। महांध
कारे शुक्लरूपतेजःसाक्षात्कारापत्तेः। अत्रोच्यते। द्रव्यचाक्षुष ८ ॥

मांत्रे आलोकसंयोगो हेतुः। न च आलोकसंयोगस्य व्यभिचारः। आलोकाकाश संयो
गस्य आलोके विरहत्वात्। तस्य द्विष्ठत्वात्। न चैवं अन्धकारे सुवर्णसाक्षात्कारत्वा
पत्तिः। अन्तिमिश्रतेजोलोकसंयोगस्येव हेतुत्वात्। सुवर्णरूपत्वमभिमतं। अन्यथा सुवर्ण
रूपालोकसंयोगाद्रूपान्तरस्य हापत्तेः। स प्रदाय विरहस्तु। सुवर्णभिन्नं यत्तेजः तद्भिन्न
द्रव्यचाक्षुषे आलोकसंयोगो हेतुः। भवति च सुवर्णमपि सुवर्णभिन्नयत्तेजः
तद्भिन्नमतः न दूरेपि आलोकसंयोगो हेतुः। तेनान्धकारे न सुवर्णसाक्षात्कार
इत्याहुः। तन्नापि पूर्वस्यां दिशि आलोकसंयोगवत्तः परस्यां तद्देशसंयुक्तस्यापि
नत्वादेः पश्चाद्दिगवस्थितपुरुषेण साक्षात्कारः स्यात्। आलोकसंयोगस्य पूर्व
दिगवच्छेदेन सत्वात्। न चैवं। यदवच्छेदेनालोकसंयोगः तदवच्छिन्नचक्षुःसंयोग

॥श्रीमम॥१॥ स्यहेतुत्वादिरूपेण च तदभावात् ।सुप्रत्यादेरतत्॥ विशेषणता नाम प्रत्यासत्तिः। द्रव्यसमवाया
भावयोः सत्वात् ।अन्यथा तयोः भानमस्ति ॥ अयं घटः अयं पटः अयं रूपवानयं
चलति ।इति प्रत्यक्षमेव घटत्वरूपं च लक्षणं संबंधविषयकं समवाये मानं ।
नास्ति घटादीनामन्यः संबंधोऽस्तीति चेन्न ॥ स्वरूपसंबंधरूपेणाप्याधारधेयभावस्य
स्यपर्याप्तत्वात् ।नास्ति समवायोऽपरः घटत्वस्याधारतापघटादावपि सत्वात् ।एकत्रैव हि घटे
अवयवावयविनोः समवायः मेव ।घटे घटत्वरूपेण च समवेतं तन्तुषु ।पटः समवेतः इहकर्म
समवेतमित्यनुगतसमवायाकारप्रतीत्यानुत्सिद्धेः अन्योन्याभाववत्त्वे सत्यघटो नास्तीति
प्रतीत्यपरत्वानिदर्शे ।अत्र प्राभाकराः ।नाभावोऽधिकः किंतु केवलाधिकरणरूपए
भावतः ।किंतु तत्तत्प्रत्यासत्त्यंतरकल्पनेन ॥१॥ ननु किमिदं कैवल्यं भानतस्वरू

मुक्तिः कैवल्यमित्यर्थः

अथ धाराधेयभावाङ्गीकारात् ८

यदेतत् सघटं भूतलं स्यादिति प्रतीत्यापत्तेः। घटाभाववत्त्वं चोत्सिद्धप्रभावेनेति चेन्न।
तथाधिकरणभेदद्विरभावो ङ्गीक्रियते तदधिकरणस्यैवाभाववत्त्वाङ्गीकारा
त्। तथा भेदे चाधाराधेयभावानुपपत्तिः। घटाभावे घटो नास्तीति
प्रतीतिः। अभेदेपि त्वया तथाभावाङ्गीकारात्। न चान्य एव घटाभावेघ
टाभावः। अनवस्थापत्तेरप्रसिद्धान्तात्। अत्रोच्यते।। यदि भूतले विशे
षो घटाभाववस्तदा भूतले घटाभाववदिति। अभावाधिकरणाश्रयत्वे न
स्यात्। यदि भूतले भूतलाधिकरणं भूतले भूतलमिति प्रतीत्यापत्तेः। किं
च यत्रेदानीं घट आनीतस्तदधिकरणे घटाभावो न वा। आद्ये इदानीं घटो ना
स्तीति प्रत्ययः स्यात्। अन्त्ये। अन्यदापि घटो नास्तीति प्रत्ययो न स्यात्। किं च क
घटे नीलेपि

सर्वदा घटाभावध्वंसयोः प्रतीतिरपि कपालेकस्यात् ।

कपाले घटो भावप्रतीतिर्घटो नष्ट इति प्रतीतिरस्ति कपाले पूर्वं घटाभावः उ
त्तरकाले घटध्वंसस्तयोर्दिकपालयोस्तदा सर्वदा तत्प्रतीतिः स्यात् । कपा
लस्य सत्त्वात् । अन्यथा कपालप्रतीतिरपि न स्यात् । किंच मोक्षो दुःखाभाव
स्वरूपः स्यात् । तथा चासाध्यतापत्तिर्नित्यत्वादिति संक्षेपः । स्यादेतत् ।
एवं घटाभावो नास्तीति प्रतीत्या घटाभावाभावोऽप्याधिकः स्या । स्यादेवेति चे
न्नेति तदभावोऽप्याधिकः स्यादित्यनवस्था । केवलाधिकरणे तदभाव
इति चेन्न हि सर्वत्र स एवाभावोस्तु भवदुक्तदूषणगणप्रसंगश्चैवं
स्यात् । अत्र ब्रूमः । घटाभावाभावो घट एव तत्सत्त्वे घटाभावो नास्ती
ति प्रतीतिः न च केवलाधिकरणस्वरूप उक्तयुक्तेरिति संप्रदायः ॥ न चास्तु ॥
घटाभावाभावोऽधिक एव को भावत्वेन तत्प्रतीतेर्न चायं भ्रमः । बाधकाभावात् ॥

तत्स्वभावस्य केवलाधिकरणस्वरूपत्वे किम् मानम् सर्व्वः ६
एकाधिकरणाभावाभावत्विरूपत्व सर्व्वः ९

अधिकरणाद्भिन्नत्व सर्व्वः ५
प्रथमाभावस्याभावः
कैवल्याधिकेन ४

रि

१०

तदभावस्तु घटाभाव एवनाधिक इति नानवस्थेत्याहुः ॥ स्यादेतत् । भूत
लेघटभेदभिन्नं नवान्त्वं सोन्यायातं भूतले तुमेव घटभेद इत्यनेन ॥ आ
घेत भेदभेदोप्यधिकः स्यादेवेति चेत् । नहि तद्भेदोप्यधिकः स्यादित्यनव
न्या॰ ७ स्था । अथानवस्थाभयाद्भेदभेदो नाधिकः किंत्वधिकरणस्वरूप इति चेन्न ॥
भवद्भिरुक्तदूषणगणप्रसंगात् । अत्राहुः ॥ भेदभेदोप्यधिक एवानैवं ॥ तद्भे
दोप्यधिकः स्यात् । दृष्टत्वाच्चेयमनवस्था दोषाय प्रामाणिकत्वात् ।
तदाहुः ॥ सर्वैर्नोक्तैव स्त्यन्यथानुपपत्तिरिति संक्षेपः ॥ समवायप्रभावो द्वि
धा ॥ अन्योन्याभावः संसर्गाभावश्च ॥ तत्रेदमिदं न भवति । इदमेतद्भिन्न
मिति प्रतीतिसाक्षिकोऽभावोऽन्योन्याभावः ॥ यदिदमाहुः । तादात्म्यसंबंधा

को॰२ अन्योन्याभावः१ त्रैकालिकः संसर्गावच्छिन्नप्रतियोगिताकोऽभावः

संसर्गावच्छिन्नप्रतियोगिताकोऽभावो इति। तदन्योऽभावः संसर्गाभावः। सोपि त्रिविधः॥
अत्यन्ताभाव प्रागभाव ध्वंस भेदात्। तत्र नास्तीत्यनुभवसिद्धो नित्यः संसर्गा
भावोऽत्यन्ताभावः। विनष्ट इति प्रतीतिसाक्षिकः उत्पत्तिमान् भावो ध्वंसः॥
स च न विनाशी तद्विनाशकल्पनायां मानाभावात्। नहि विनाशो विनष्ट इति
कश्चित्प्रत्येति। तत्प्रागभावश्च घटादिरूपप्रतियोगी तत्प्रागभावश्च उभय
त्र ध्वंसो भविष्यतीति प्रत्ययात्। विनाश्यभावः प्रागभावः। स च भविष्यतीति
त्यनुभवसाक्षिको दुरपह्नवः। तस्य च ध्वंसः प्रतियोगी तद्ध्वंसश्च
उभयमेव विनष्टः प्रागभाव इति प्रतीतिः। अत्यन्ताभावान्योन्याभावश्च नि
त्यो। नित्यश्चाभावो द्विविधः। एकमात्रवृत्तिधर्मावच्छिन्नप्रतियोगिताको ११
न्यश्च। न वा स्येमानाभावः। घटवति घटपटौ न स्तः। घटो न घटपटौ एको
प्रतियोगिकाले प्रतियोगिकालेऽसत्त्वं
सामस्त्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकाभावः१

प्रतियोग्यभाव
वादि सटी° २

नद्वाविति प्रतीतेः। एकघटवति द्वित्वावच्छिन्नतदत्यन्ताभावस्य एकस्मि
न्नुभयान्योन्याभावस्य च सत्वात्। न च प्रतियोगिमति कथं तदभावः तयोर्वि
रोधादिति वाच्यं। प्रतियोगितावच्छेदका [illegible] वच्छिन्नेनैवाभावस्य विरो
धात्। न चैको द्वित्वावच्छिन्नः। एको द्वाविति प्रतीतेः। अत एव दंडीपुरुषो दं
डश्रूयतीति पुरुषे सत्यपि दंडपुरुषो नास्तीति धीः वक्ष्यमाणविशिष्टाभावो विरो
षएणावच्छिन्नविशेष्याभावरूपोऽभ्युपेयते॥ न च यदं [illegible] भा
वविषयादंडवत्यपि तथा प्रतीतेः। न च पुरुषाभावविषयात्तस्य सत्वात्
तस्माद्यत्र विशेष्यस्याभावो विशेष्याभाव उभयाभावो वा तत्रतो विशिष्टा
भावो विशेष्यः॥ भयस्तु॥ स्माभावोनेन्द्रियग्राह्यः- कृत्स्नसंन्निकर्षाभा

एकमावच्छिन्नावच्छिन्नपुरुषाभावादिति शेषः १

स्माभावीयविशेष्यत्वस्य तादृशानंप्रतिदंडस्य तादृशस्य प्रतिबंधकत्वात् स्वयं दंडाभावविषयिणीत्यनुष्ठ

प्र.प्र.
॥१२॥ प्रमाभावात्। किंत्वनुपलब्धिरूपप्रमाणगम्यइत्याहुः। तत्रेदमाहुः साक्षा
त्करोमीतिप्रतीतेः प्रत्यक्षेणैवायमितिचेदत्रापि। पश्यामीघटाभाव
मितिप्रतीतेरध्यक्षएवेतितुल्यं। किंचानुपलब्धेः प्रमाजनने व्या
पाराभावात्कथं प्रमाकरणत्वं व्यापारवद्धिकारणं करणमित्युक्ते
नन्वेवं घटाभाववतिघटोपलब्ध्यावपिघटाभावप्रत्ययः स्यादतइं
द्रियसंबद्धविशेषणतायाः सत्वादितिचेन्न। योग्यानुपलब्धेरभावग्र ॥१२॥
हहेतुत्वात्। अथकेयं योग्यानुपलब्धिः योग्यस्यप्रतियोगिनोनुप
लब्धिः सहकारिणीतिमतं। तन्न। तन्तुपरमाणौपृथिवीत्वाभावग्रहापत्तेः।
तन्ना प्रमाणांतरकल्पनात्। संन्निकर्षांतरकल्पनापाल्लघुत्वात्। कान्यथासंयोगादीनां
स्वरूपाणांसन्निकर्षाणांमभावात्। तस्मादपिप्रमाणांतरकल्पनापत्तेः॥ + ८

नवतिहियथीवीत्वे वस्तुयोग्येत दनुपलब्धिश्च जलपरमाणौ स्तंभे
पिशाचभेदग्रहानुपपत्तेः। पिशाचस्य प्रतियोगिनो योग्यत्वेन तत्र घटयो
ग्यत्वाधिकरणे प्रतियोगिनो यत्वेऽपि अर्थः सति चेन्न। भूतले पिशाचात्यंता
भावग्रहापत्तेः। अत्यंताभावग्रहे योग्यप्रतियोग्यनुपलब्धेरन्यो
न्याभावग्रहे च योग्येऽधिकरणे प्रतियोगितादात्म्यानुपलब्धेः स
हकारित्वमिति मतं। तन्न। जलपरमाणौ पृथिवीत्वात्यंताभावग्र
हापत्तेः। वायावुद्भूतरूपवद्भेदग्रहानापत्तेः। न चेष्टापत्तिः अनु
भवविरोधात्। अत्रोच्यते। योग्यासहकारिसंयोगानुपलब्धेः
कारणे अत एवांधकारे न घटाभावग्रहश्चक्षुषा। तत्रालो

अतो वाधिकरणे ... संनिकर्षस्यापि इत्यर्थः १
संनिकर्षो भावाभावे २

प्र.अ.टी. कोधिकरणां संन्निकर्षस्यापि हेतुत्वात् । न वा जलपरमाणौ
१३ पृथिवीत्वाभावग्रहः । योग्यसंन्निकर्षो योग्यः पृथिवीत्वाभावग्रा
हकः इति चेदिंद्रियसंनिकृष्टमहत्वोद्भूतरूपवद्द्रव्यस्य तादृशतदुद्भूत
रूपवत्वाभावे तु इंद्रियसंनिकृष्टमहत्वं द्रव्यस्य योग्यसंन्नि २४
कर्षः । अतो मनसि न तद्ग्रहः । भवति च महति वायावयमन्यत्रापि सं
न्निकर्षो योग्यः कार्यत्वग्राहकुर्न्याय ... यित्वाद्वायत्यंताभावस्य च योग्यत्वादेव न
गृह्यते । ... पुनः ... त्यंताभावे योग्यता योग्यमात्रप्रतियोगिके योग्यधर्मा
वच्छिन्नप्रतियोगिताकत्वं विशेषणमेवमन्यत्राप्यनुभवानुसारेण ॥१३

योग्यताबाध्या। सर्वाभावसाधारणं किं योग्यत्वमिति चेन्न। किंचिदि
त्तिग्रहाणत्तत्र। किं ज्ञानेवाभावयोग्यता इति ध्येयम्। गुणयोग्य
तावद्नेनानुगतस्यैवत्त्वादिजिलक्षणः। अथ किमिदं चक्षुरादि।
तैजसमिंद्रियं रूपग्राहकं महदिंद्रियं वा चक्षुः। वायवीयमिंद्रि
यं स्पर्शग्राहकं महदिंद्रियं त्वक्। आप्यमिंद्रियं रसग्राहकं म
हदिंद्रियं रसनं। पार्थिवमिंद्रियं गंधग्राहकं महदिंद्रियं वा घ्राणं।
महत्त्वं च मनोनाश्रयत्वाय कर्णेऽव्याप्तिवारणाय। श्रोत्रं शब्दग्रा
हकं महत्त्वं चानिस्पर्शेन मनस्त्वनिस्पर्शोयदं पार्थिवाणुवारणा।

म.न.टी. या। अत्राणुपदं विभुवारणाय। अत्र मीमांसकाः मनो नाणुः किं तु वि
११५४। भु नित्यस्पर्शशून्यत्वात् आत्मवत्। मनस्त्वं चात्मान्यत्वे सति ज्ञानास
मवायिसंयोगाश्रयमित्याहुः। तन्न। विभुत्वे आत्मना संयोगानु
पपत्तेः। तथा हि संयोगो द्विविधः। कर्मजोऽवयवसंयोगजश्च।
न च विभोरात्मनः कर्मास्ति मनोऽपि च। यदि विभुस्तदा तस्यापि
कर्माभावान्न कुतः कर्मजसंयोगः भवेत्। नैतयोरवयवोऽस्ति येन
तत्संयोगः स्यात्। न च नित्य एव विभ्वोः संयोगः संयोगजसंयोगनिषेधात्। कु
तोऽनिषेध इति चेन्न प्रमाणाभावात्। संयोगत्वावच्छेदेन द्रव्यजन्य
त्वावधारणात्। अप्रयोजकं चेदनुमानमिति संक्षेपः॥ ॥१५४॥

दृष्टं ५

[illegible]

इतीश्रीभट्टाचार्यचूडामणिकृतायांन्यायसिद्धांतमंजर्यांप्रत्य
क्षपरिच्छेदः॥ ॥अथानुमाननिरूपणं॥ अनुमितिकरणं
अनुमानं॥ अनुमितित्वं च अनुमिनोमीत्यनुभवसिद्धो जातिविशेषः॥
जन्यज्ञानजन्यत्वाव्यभिचारः। जन्यज्ञानधीजन्यत्वव्यभिचारि जातिमद
नुभवत्वं वा। प्रत्यक्षत्ववारणाय जन्यज्ञानजन्यत्वाव्यभिचारीति। ज्ञा
नाजन्ये नित्ये निर्विकल्पके च तत्तद्धीजन्यत्वंव्यभिचरति। तत्रापि प्र
थमजन्यपदं। चाक्षुषत्वादिवारणाय तद्धीश्वरज्ञानजन्यत्वाव्य
भिचारि। सर्वेषां तदाश्रयाणामीश्वरधीजन्यत्वात्। उपमितित्ववा
रणाय व्यभिचारीत्यंतेन तद्भिन्नप्रयोजकज्ञानजन्यत्वव्यभि
द्वत्ववारणाय

मंजरी॰ का रि॥ तुयमितिनोसन्नीसोऽशब्दविषयककानित्देशाद्वाक्यार्थज्ञानजन्य
॥१५॥ त्वात्॥ शाब्दानुभवानां सर्वेषां शाब्दज्ञानजन्यत्वात्॥ न च शाब्दज्ञानज
रा न्यत्वव्यभिचार इति तिसम्यक्॥ अनुमितित्वस्य द्वेष्वसियशाब्दज्ञानज
न्यत्वाव्यभिचारित्वेनासंभवात्॥ न च मोक्षजनकतावच्छेदकं तत्त्व
ज्ञानवृत्तिसामान्यं जन्यज्ञानजन्यमात्रवृत्तित्तिवृत्त्यतिव्याप्तिः॥ तस्य शा
ब्दविक्रोषविषयकमननजन्यमात्रवृत्तित्वेन जन्यशाब्दज्ञानजन्यत्वाव्य
भिचारित्वात्॥ जातिपदं वा मानसावृत्तिजातिपरं॥ अत एव भोक्तिश्रद्धा
दृढं द्वौ सः॥ अनुभवपदं स्मृतिवारणायेति दिक्॥ ननु किमिदं तत्त्व
तस्मिति चेन्न॥ व्याप्तिविशिष्टपक्षधर्मघटकलघुपदार्थज्ञानमिति १५
टहो सः॥ ननु केयं व्याप्तिः॥ अनौपाधिकसाध्याभावाभाववद्वृत्तित्वं॥

४ दृष्टान्ताप्रतिपादकवाक्यैर्मज्ञानं तेन यज्ज्ञानं सम्भवति॥
४ एवं कर्मप्रतिपादकवाक्यैर्मज्ञानं तेन ज्ञानेयज्ज्ञानं साम्प्रतं॥

निरूपितत्वसामान्ये दोषिन विघ्नातीत्या
द्याह ३

पर्वतीयवह्न्यत्यन्ताभाववति धूमस्यासत्त्वात्। नापि साध्यवदन्यावृ
त्तित्वं वह्निमत् पर्वतान्यत्ववदवृत्तित्वात्तद्धूमस्य। अथ साध्यवत्त्वा
वच्छिन्नान्योन्याभाववदवृत्तित्वं विवक्षितं। न च धूमवति वह्निमत्त्व
सामान्यावच्छिन्नान्योन्याभावो वर्त्तते। धूमवान् वह्निमानित्यप्र
तीतेरिति चेन्न। केवलान्वयिसाध्यकाव्याप्तेः। अत्र मीमांसकास्तु॥ केव
लान्वयिसाध्यकमनुमानमेव न कुत्रापि व्याप्यत्वाभावादित्याहुः॥
तन्न। इदं प्रमेयत्ववदनुमिनोमीत्यनुभवापलापापत्तेः। न च कारणाभा पा४
वात्कार्यानिष्पत्तिः। व्यभिचारे सोवतद्धेतोः कारणत्वासिद्धेः। सोगमात्तु॥
केवलान्वयिनि साध्यवदन्यदलीकमेवास[illegible]त्तेः स्वरूपासिद्धेस्तद्वृ
त्तित्वज्ञानादेवानुमितिरित्याहुः॥ तन्नात्र सतस्यान्तरासिद्धेः॥ किंच

पक्षे साध्यवत्त्वरूपी। सत्वादित्यादावतिव्याप्तेः। ८

मं.मा. १६ हेतुयन्न साध्यकैरूप्यमव्याप्तिः दुर्बोधा। मल्लौकिकमज्ञेयभवद्भिरिष्यते।
अन्येतु कार्त्स्न्येन संबंधो व्याप्तिरित्याहुः। तत्र वह्निकोयं कार्त्स्न्येन संबंधः
कार्त्स्न्येन साध्येन हेतोः संबंधः किं कृते हेतौ साध्यसमानाधिकरण्यं वा
कार्त्स्न्ये हेतुमति साध्यवत्त्वं वा। नाद्यः। पर्वतसिद्धानुमाने अव्याप्तेः। न हि धू
मस्य कार्त्स्न्ये वह्निसमानाधिकरण्यमस्ति। अयःपिंडीयवह्नेः सामानाधिक
रण्याभावात्। न द्वितीयः। एक व्यक्तिहेतावव्याप्तेः। नान्त्यः। एकमात्र शश्चाने
त्रैवृत्तिहेतावव्याप्तेः। अत्रोच्यते। साध्यसमानाधिकरणस्य समाना साम्कमृ
धिकरणयावत्कृत्वं व्याप्तिः। यत्समानाधिकरणाः यावंतः साध्यसमाना नादिम
धिकरणाः स्तत्त्वं व्याप्तिः। इति यावन्तो भवन्ति हि धूमसमानाधिकरणाः धर्मः ४ दकवित

१६

यावंतो वह्निसमानाधिकरणाः इति धूमे वह्निव्याप्तिः न पुनर्वह्नौ धूमस्य
। न हि वह्निसमानाधिकरणाः यावंतो धूमसमानाधिकरणाः क्रोड्यः किं
न्तु स्व वह्निसमानाधिकरणस्य धूमासमानाधिकरणत्वात् । एवं द्वित्रि
ष्ट समानाधिकरणाः यावंतः साध्यसमानाधिकरणाः स्तत्वेशः । संभवति
धूमत्वविशिष्टसमानाधिकरणाः यावंतो वह्निसमानाधिकरणाः स्त
त्वं च धूमे । न च इदं द्रव्यं धूमं प्रति वह्नित्वे । ननु नो वह्नौ धूमव्याप्तिः । तत्र ति
नेदं केवलान्वयि नित्यभिधेयत्वविशिष्टसमानाधिकरणानां यावतां मेयत्व
समानाधिकरणत्वात् । एवं च व्यापकात्साध्यवदन्यावृत्तित्वे सति समाना
धिकरणव्याप्तिः । न चेदं केवलान्वयिन्यास्ति । अतो नेदमनुमानमिति ।
मीमांसकमतं तत्र यासां । ततो व्यस्य न घुत्वात् । तत्र चार्वाकाः । भवतु इद

[illegible]

बहुषु साध्यसाधनयोः सहचारदर्शनात् व्यभिचारशङ्कानिवृत्तिः ३
धूमसमानाधिकरणत्वसामानाधिकरण्येन वह्निसमानाधिकरणस्य भासमान [illegible]

[illegible] व्याप्तिः ॥ न तु व्यभिचारशङ्कास्य ग्रहः । किंचित् धूमसमानाधिकरणो वह्निसमानाधिक
॥१६॥ रणो भविष्यतीति शंकाया दुर्वारत्वात् । न चेष्टशंकायां व्याप्तिनिश्चयो भावि
तुमर्हति तस्यास्तत्प्रतिबन्धकत्वात् । न च भूयोदर्शनात्तन्निवृत्तिः शत
शः सहचरितयोरपि व्यभिचारोपलब्धेः । न च तर्कान्निवृत्तिः तर्कस्य
व्याप्तिनिश्चयमूलकत्वेनानवस्थानात् । उस्य च ग्राहकाभावात् । व्याप्ते
रग्रहे कुतोऽनुमानं स्यादिति । अत्रोच्यते । व्यभिचारज्ञानविरहादिरेव
व्याप्तिग्राहकं । न च तच्छंकाविरहो दुःशंकः क्वचित्तर्कात् क्वचित्स्व
तोऽभ व्याप्याद्युभयकोटिस्मरणाद्यभावादपि तन्निवृत्तिः । न हि सर्वे
षां व्यभिचारशङ्काकोटिस्मृतिर्वास्ति अनुभवेनैवेति हि कः ॥१६॥

धूमो यदि वह्निमभिचारी स्यात्तदा वह्निजन्यो न स्यात् इति तर्कः ॥

ननुइयंदृष्टांतवृत्तिधूमेगृहीता।नैवपक्षीयेपि।तथाचकथंत
दनुमितिः।पक्षवृत्तिधूमेव्याप्तिग्रहस्यानुमितिहेतुत्वादितिचेन्न।
